मामभीदा शरण्यामुत्सदेवारुक्प्रदा च धीः।
धीरा पवित्रा सत्वासात्वासीशा मातरारम ॥
माननापरुषं लोकदेवीं सदस सन्नम।
मनसा सादरं गत्वा सर्व्वदा दास्यमङ्ग ताम् ॥
मा मुघो राजस स्वासूंल्लोककूटेशदेवताम्।
तां शिवावाशितां सिद्धाध्यासितां हि स्तुतां
स्तुहि ॥
माहिषाख्ये रणेऽन्या तु सौ तु नानेवमत्र हि।
हिमातङ्कादिवासुं च कं कम्पिनमुप्रभुतम् ॥
मातङ्गानङ्गविधिनासुना पादं तमुद्यतम्।
तङ्गयित्वा शिरस्यस्य निपात्याहन्ति रंहसा ॥"

अथ चक्रे वर्णविन्यासक्रमः।




चक्रः, पुं, (करोति अस्फुटशब्दम्। कृ + बाहुलकात् कः ततो निपातनात् द्वित्वे साधुः।) चक्रवाकपक्षी। इत्यमरः। २। ५। २२ ॥

चक्रकः, त्रि, (चक्र इव कायति प्रकाशते इति। कै + कः।) तर्कविशेषः। तस्य लक्षणं यथा। स्वापेक्षणीयापेक्षितसापेक्षितत्वनिबन्धनप्रसङ्गत्वम्। अपेक्षा च ज्ञप्तौ उत्पत्तौ स्थितौ च ग्राह्या। तत्राद्या यथा। एतद्घटज्ञानं यद्येतद्घटज्ञानजन्यज्ञानजन्यं स्यात् तदा एतद्घटज्ञानजन्यज्ञानभिन्नं स्यात्। द्वितीया यथा। घटोऽयं यद्येतद्घटजन्यजन्यजन्यः स्यात् तदा एतद्घटजन्यजन्यभिन्नः स्यात्। तृतीया यथा। घटोऽयं यद्येतद्घटवृत्तिवृत्तिः स्यात् तथात्वेनोपलभ्येत इति। इति तर्कशास्त्रम् ॥ (वेदान्तदर्शनमते तु "स्वग्रहसापेक्षग्रहकत्वं आत्माश्रयः। स्वग्रहसापेक्षग्रहसापेक्षग्रहकत्वं अन्योन्याश्रयः। स्वग्रहसापेक्षग्रहसापेक्षग्रहसापेक्षग्रहकत्वम् चक्रकम् ॥")

चक्रकारकं, क्ली, (चक्रं चक्रवदाकारं करोत्यात्मनः वक्रनखाकृत्या इति शेषः। यद्वा चक्रं चक्राकृतिरेखादिकं करोतीति। कृ + ण्वुल्।) व्याघ्रनखनामगन्धद्रव्यम्। इत्यमरः। २। ४। १२६ ॥

चक्रकुल्या, स्त्री, (चक्रस्य चक्राख्यौषधीलतावृक्षभेदस्य कुल्या इव।) चित्रपर्णी। इति शब्दचन्द्रिका ॥ चाकुलिया इति भाषा ॥ (चित्रपर्णिकाशब्देऽस्या विवरणम् ॥)



चक्रगजः, पुं, (चक्रेण चक्राख्यया गज्यते शब्द्यते। यद्वा चक्रे चक्राकृतिदद्रुव्याधौ गज इव। गज इव दद्रुरोगमर्द्दक इत्यर्थः।) चक्रमर्द्दवृक्षः। इति राजनिर्घण्टः ॥

चक्रगण्डुः, पुं, (चक्रमिव वर्त्तुलाकारो गण्डुः।) वर्त्तुलाकारोपाधानम्। इति चतुरशब्दार्थे हेमचन्द्रः ॥ गोलबालिश इति गालबालिश इति च भाषा ॥

चक्रगुच्छः, पुं, (चक्रवद्गुच्छः पुष्पगुच्छोऽस्मिन् अस्य वा।) अशोकवृक्षः। इति शब्दचन्द्रिका ॥

चक्रजीवकः, पुं, (चक्रेण कुम्भाद्युत्पादनयन्त्रविशेषेण जीवतीति। जीव + ण्वुल्।) कुम्भकारः। इति हेमचन्द्रः ॥

चक्रदंष्ट्रः, पुं, (चक्रं चक्राकृतिर्दंष्ट्रायां यस्य चक्रमिव दंष्ट्रा यस्येति वा।) शूकरः। इति राजनिर्घण्टः ॥

चक्रदन्ती, स्त्री, (चक्रमिव दन्तरूपमिव च इत्येके।) दन्तीवृक्षः। इति राजनिर्घण्टः ॥

चक्रदन्तीबीजं, क्ली, (चक्रदन्त्या बीजम्।) जयपालः। इति राजनिर्घण्टः ॥

चक्रधरः, पुं, (धरतीति। धृ + अच्। चक्रं सुदर्शनाख्यं द्वादशारादिलक्षणलक्षितमस्त्रम्। तस्य धरः। चक्रं धरति धारयतीति वा।) विष्णुः। (यथा, रघुः। १६। ५५।

"विगाहितुं श्रीमहिमानुरूपं
प्रचक्रमे चक्रधरप्रभावः ॥"

चक्रं फणा तस्य धरः।) सर्पः। (यथा, महाभारते। ३। ८५। ७०।

"अङ्गिरःप्रमुखाश्चैव तथा ब्रह्मर्षयोऽपरे।
तथा नागाः सुपर्णाश्च सिद्धाश्चक्रधरास्तथा ॥")

ग्रामजालिनि त्रि। इति मेदिनी ॥ (यथा, महाभारते। ३। ८५। ७६।

"यजन्ते क्रतुभिर्देवास्तथा चक्रधरा नृपाः ॥")

चक्रनखः, पुं, (चक्रमिव नखः नखाकृत्यंशविशेषोऽस्यस्य इति। "अर्श आदिभ्योच्" इत्यच्।) व्याघ्रनखनामगन्धद्रव्यम्। इति राजनिर्घण्टः ॥

चक्रनामा, [न्] पुं, (चक्रं सरघानिर्म्मितमधुचक्रं तन्नामैव नामास्य।) माक्षिकधातुः। इति हेमचन्द्रः ॥

चक्रनायकः, पुं, (चक्रं कर्षणजन्यचक्राकाररेखादिकं नयतीति। नी + ण्वुल्।) व्याघ्रनखः। इति राजनिर्घण्टः ॥ (चक्रस्य नायके त्रि ॥)

चक्रपद्माटः, पुं, (चक्र चक्रवत् यत् पद्मं दद्रुरोगः तत्र अटति तं मर्द्दातीत्यर्थः।) चक्रमर्द्दकवृक्षः। इति शब्दरत्नावली ॥

चक्रपरिव्याधः, पुं, (चक्रं दद्रुरोगं परिविध्यतीति। परि + व्यध + अण्।) आरग्वधवृक्षः। इति वैद्यकम् ॥

चक्रपर्णी, स्त्री, (चक्राकारं पर्णमस्याः इति। जातौ संज्ञायां वा ङीष्।) चक्रकुल्यालता। इति शब्दचन्द्रिका ॥

चक्रपाणिः, पुं, (चक्रं सुदर्शनास्त्रं पाणौ यस्य। व्यधिकरणबहुव्रीहिसमासः।) विष्णुः। इत्यमरः। १। १। २० ॥ (यथा, विष्णोरष्टोत्तरशतनामकीर्त्तने।

"वैकुण्ठश्चाच्युतो रामश्चक्रपाणिरधोक्षजः ॥")

चक्रपादः, पुं, (चक्रं पाद इवास्य।) रथः। (चक्रवत् पादा यस्य।) हस्ती। इति जयपालः ॥

चक्रपुष्करिणी, स्त्री, (चक्रेण विष्णुचक्रेण खनिता पुष्करिणी।) मणिकर्णिका। इति काशीखण्डम् ॥

चक्रफलं, क्ली, (चक्राकारं फलं फलकमस्य।) अस्त्रविशेषः। तत्पर्य्यायः। अट्टनम् २। इति त्रिकाण्डशेषः ॥

चक्रबान्धवः, पुं, (चक्रस्य पद्मस्य बान्धवः बन्धुः।) सूर्य्यः। इति हेमचन्द्रः ॥

चक्रभृत्, [द्] पुं, (चक्रं बिभर्त्तीति। भृ + क्विप्।) विष्णुः। इति हेमचन्द्रः ॥ (यथा, राजतरङ्गिण्याम्। १। ३८।

"चक्रभृद्विजयेशादिकेशवे गानभूषिते ॥")

चक्रभेदिनी, स्त्री, (चक्रं चक्रवाकमिथुनं भिनत्ति पृथक् करोतीति। भिद् + णिनिः। ततो ङीप्। निशायां हि चक्रवाकयोर्वियोजनं भवतीति लोकप्रसिद्धम्।) रात्रिः। इति त्रिकाण्डशेषः ॥

चक्रमण्डली, [न्] पुं, (चक्राकारेण यन्मण्डलं तदस्त्यस्य इति इनिः।) अजगरसर्पः। इति हेमचन्द्रः ॥

चक्रमर्द्दः, पुं, (चक्रं चक्राकारदद्रुरोगं मर्द्दातीति। मृद + "कर्म्मण्यण्।" ३। २। १। इत्यण्।) क्षुपविशेषः। चाकुन्दिया इति भाषा ॥ तत्पर्य्यायः। एड़गजः २ अड़गजः ३ गजाख्यः ४ मेषाह्वयः ५ एड़हस्ती ६ आवर्त्तकः ७ चक्रगजः ८ चक्री ९ पुन्नाटः १० पुन्नाड़ः ११ विमर्द्दकः १२ दद्रुघ्नः १३ तर्व्वटः १४ चक्राह्वः १५ शुकनाशनः १६ दृढ़बीजः १७ प्रपुन्नाड़ः १८ खर्ज्जुघ्नः १९। इति राजनिर्घण्टः ॥ चक्रमर्द्दकः २० पद्माटः २१ उरणाख्यः २२। इत्यमरः। २।४।१४७ ॥ प्रपुन्नड़ः २३ प्रपुनाड़ः २४ उरणाक्षः २५। इति तट्टीका ॥ अस्य गुणाः। कटुत्वम्। तीव्रत्वम्। मेदोवातकफकण्डूकुष्ठदद्रुपामादिदोषनाशित्वञ्च। इति राजनिर्घण्टः ॥ लघुत्वम्। स्वादुत्वम्। रूक्षत्वम्। पित्तश्वासकृमिनाशित्वम्। हृद्यत्वम्। हिमत्वञ्च। तत्फलगुणाः। उष्णताकुष्ठकण्डुदद्रुविषानिलगुल्मकासकृमिश्वासनाशित्वम्। कटुत्वञ्च। इति भावप्रकाशः ॥ (अस्य गुणाः पर्य्यायाश्च यथा, भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे।

"चक्रमर्द्दः प्रपुन्नाटो दद्रुघ्नो मेषलोचनः।
पद्माटः स्यादेड़गजश्चक्री पुन्नाट इत्यपि ॥
चक्रमर्द्दो लघुः स्वादू रूक्षः पित्तानिलापहः।
हृद्यो हिमः कफश्वासकुष्ठदद्रुक्रिमीन् हरेत् ॥
हन्त्युष्णन्तत्फलं कुष्ठकण्डूदद्रुविषानिलान्।
गुल्मकासक्रिमिश्वासनाशनं कटुकं स्मृतम् ॥")

चक्रमर्द्दकः, पुं, (चक्रं दद्रुरोगविशेषं मर्द्दातीति। मृद् + ण्वुल्।) चक्रमर्द्दः। इत्यमरः। २। ४। १४७ ॥ (स्त्रियान्तु टापि अत इत्वञ्च।